N.V. निगमान्तम्.

श्रीः

पाण्डवधार्तराष्ट्रसम्भवम्



कविः

वाशिष्ठ गणपतिमुनिः



-: व्याख्याता :-

श्री अ. नरसिंहशर्मा

उपन्यासकः, अनेकतंत्र स्वतंत्र
वेदान्तदेशिक, साहित्यसार्वभौम.

सर्वस्वाम्यसंकलितम्

मूल्यम् 2-00

श्रीः

पाण्डवधार्तराष्ट्रसम्भवम्



कविः

वाशिष्ठ गणपतिमुनिः



-: व्याख्याता :-

श्री अ. नरसिंहशर्मा

उपन्यासकः, अनेकतंत्र स्वतंत्र
वेदान्तदेशिक, साहित्यसार्वभौम.

सर्वस्वाम्यसंकलितम्

मूल्यम् 2-00

నివేదనము.

మాతతగారైన శ్రీ భగవాన్ కావ్యకంఠ గణపతిముని రచనలను ప్రచురణ మొదలైన కార్యములను నిర్వహించుటకు సర్వాధికారాలతో మాకు పినతండ్రియగు నరసింహశర్మగారిని అనుమతించినాము. వారు అంగీకరించినారు. కాన శ్రీవారి రచనల విషయంలో ఎవరైన అన్నివిషయాలలోను వారిని సంప్రతించి ప్రచురణలు చేసుకొనవచ్చును. ఎవరైన ఇంతకు పూర్వం గ్రంథాలను ప్రచురించినచో గురుచరణులందు భక్తితో మాకు ఈయదలచిన రాయల్టీ మొదలైనవాని విషయం కూడ జనరల్ మేనేజరుగారితో సంప్రదించవచ్చును. ఇందుకు ఆక్షేపణలుకలవారు సంప్రదించి పరిష్కరించుకొనవలెను. గ్రంథాలను క్రమంగా ప్రచురించవలెనని వుంది. దానిలో మొదటిది ఈగ్రంథము. దీనిచరిత్ర కీ॥శే॥ గుం. లక్ష్మీకాన్తంగారి కథనప్రకారం వ్రాయబడినది. దీనికి సంబంధించిన ఈవిషయాన్ని తెలిపి ప్రోత్సహించిన శ్రీ R.T.N. తల్లంవెంకట సుబ్బయ్యగారు మొదలగు సాహిత్యాభిమానుల దాతలనామములు పొందుపరచినాము. కొందరినామము ప్రచురణలో ఆదరము అధికమగుటకుకూడకారణము. వీరలెల్లరు శ్రీ కృష్ణగీతాగ్రంథమును భక్తులు. (ఆగ్రంథస్థాపకులు శ్రీ నామా యెరికలయ్య. శ్రీమతి కమలాక్షమ్మగార్లు)

విశ్వవిద్యాలయాలు, పరిషత్తులు పాఠ్యములుగ నియమింపవనవి. సంస్కృతాభిమానులు గ్రంథముల నాదరింపవనవి.

దాతలు.

1.	శ్రీ R.T.N. తల్లం వెంకటసుబ్బయ్యగారు	116–00
2.	శ్రీ నామా యెరికలయ్యగారు	40–00
3.	శ్రీ వేదాంతం లక్ష్మయ్యగారు	25–00
4.	శ్రీ సత్రసాల బాలయ్యగారు	20–00
5.	శ్రీ సత్రసాల పెద్దబాలయ్యగారు	20–00
6.	శ్రీ పబ్బతి వెంకటసుబ్బయ్యగారు	20–00
7.	శ్రీ కోటరెడ్డి పుల్లారెడ్డిగారు	10–00
8.	శ్రీ కొన్న సుబ్బరాయుడుగారు	10–00
9.	శ్రీ వల్లంకొండ చిన్నవెంకటసుబ్బయ్యగారు	10–00
10.	శ్రీ సోమిశెట్టి పెద్దసుబ్బరాయుడుగారు	10–00
11.	శ్రీ V. కృష్ణయ్యగారు	10–00
12.	శ్రీ కారంశెట్టి సుబ్బయ్యగారు (జమ్మలమడుగు)	10–00
13.	శ్రీ కర్టం సుబ్బరాయప్పగారు	5–00
14.	D. లక్షుమమ్మగారు	10–00
15.	గుద్దేటి రామక్కగారు	5–00
16.	వి. నారమ్మగారు	5–00
17.	అరివేలమ్మగారు	5–00

పైవిధంగా ధనసహాయముచేసినదాతలకు అచ్చుపనిలో సహకరించిన, అభిప్రాయములనిచ్చిన పండితులకు నాకృతజ్ఞతాభివందనములు. వారినెల్లరను భగవానునికరుణాపూర్ణమైన కటాక్షము రక్షించునుగాక.

ఇట్లు, భవదీయుడు,

అ. పురందరుడు.

గ్రంథరచనలో సహకరించిన వారివివరాలు:

1. శ్రీ రామచంద్రయ్యగారు, శిరోమణి.
   ప్రిన్సిపాల్, S. M. S. O. College.
2. శ్రీ పాండురంగయ్యగారు, M. A., Vidwan,
   ఉపన్యాసకులు. S M S O College,
   ఈగ్రంథరచనను నిర్వహణమున సహకరించిరి.
3. శ్రీ N. V. నిగమాస్తంగారు, శిరోమణి, వ్యాకరణ, శిరోమణి,
   ఉపన్యాసకులు. S M S O College
   (అచ్చుప్రతి వ్రాసినవారు)
4. శ్రీ అవధానం చంద్రశేఖరశర్మగారు,
   అష్టావధాని. సాహిత్యశిరోమణి, విద్వాన్,
   ఉపన్యాసకులు. S M S O College.
   (అభిప్రాయమున్నవాసి సహకరించిరి)
5. శ్రీ M. కేశవులుగారు, విద్వాన్.
   తెలుగుపండితులు, మునిసిపల్ హైస్కూలు, తాడిపత్రి.
   (ప్రూఫులుదిద్ది అచ్చుపనిలో సహకరించిరి)
6. చి. B. శ్రీనివాసుడు విద్వాన్
   వ్యాఖ్యాలేఖకులు,
7. శ్రీ Y. శ్రీనివాసరావు గారు ఆనర్సు.
   ప్రధానాంధ్రాచార్యులు, గవర్నమెంటుకాలేజి.
8. శ్రీ రంగరామానుజప్రెస్, తాడిపత్రి.
   చక్కగా అచ్చువేసి సహకరించిరి.

श्रीः

तत्र भवतां कारणजन्मनां वाशिष्ठगणपति मुनीनां बाल्यक्रीडायितेष्वाशुकवितावि लसितेष्वन्यतमायाः पाण्डवधार्तराष्ट्रसम्भवाख्याया लघुकृतेः श्रीमद्भिरयल सोमयाजुलाभिजनैर्नरसिंहशर्म महोदयैरस्मत्सहाध्यापकैर्विरचितां व्याख्यां सप्रश्रय मवलोकयम्, विशदयन्ती भवान् विवेचयन्ती निपुणमलकारान् निरूपयन्ती काव्यगुणान् निष्पादयन्ती सौशब्द्यं व्याख्येयं पुरातन महाव्याख्यातृणां मल्लिनाथादीनां पथमनुसन्तो व्युत्पित्सूनां बालानामतीवोपकरोतीति महदिदं प्रमोदस्थानं । मन्ये सव्याख्याकृतिरियं सर्वतः पुरस्कारप्रोत्साहावर्हतीति । ईदृशीभिश्शेमुषीसखीभिर्व्याख्याभि रन्याभिश्च कृतिभिर्व्याख्यातायं कृतोभवन्विजयतामित्याशासे ।

भारती काव्यकण्ठानां बाभातु रसमञ्जुला ।
नृसिंहामोदसुभगा वासन्तीवमधूज्ज्वला ।।

इति,

सुधीविधेयः,

अवधानाभिजनः चन्द्रशेखरशर्मा

उपन्यासकः
श्री मलयालस्वामी प्राच्य
कलाशाला.

प्रोद्भूतूरु पुरी
प्रमादि मार्गशीर्ष
कृष्णत्रयोदशी
ता. 28-12-1973

श्रीः

"श्री काव्यकण्ठ"

गणपतिमुनि विरचितं

"पाण्डवधार्तराष्ट्रसम्भवाख्यं"

खण्डकाव्यम्

(घण्टात्रयस्त्रिंशद्बन्धरूपम्)

सव्याख्यानम्

"व्याख्याता"

श्री वाशिष्ठो नरसिंहशर्मा

श्रीः

"यस्य घीङ्कारनादेन त्रियामा दिवसायिता।
गणानामधिपं देवं गुरूं तं प्रणमाम्यहम्" ॥

"परिचयः"

नवत्युत्तरे अष्टादशशततमे वत्सरे (क्रिस्तुशकस्य) एकादशवर्षीयो माणवकः स्वगुरुं वेङ्कटेश्वरशास्त्रिणं अध्ययनकाले स्वप्रतिभया विस्मापयामास। बालकः उन्नतविद्यार्जनाय प्रेष्यः इति निवेदयन्तः ग्रामवासिनो वृध्दाः डिम्भकं परीक्ष्य कार्यनिश्चयाय उन्मुखा बभूवुः। तदानीन्तने माणवकस्य पिता नरसिंहशास्त्री शास्त्रविदामग्रगण्यः प्रथमः परिशीलकः नरसिंहशास्त्रिणः कनिष्ठभ्राता यन्त्रवित् प्रकाशशास्त्री द्वितीयः घनपाठो तृतीयः लक्ष्मीसरस्वत्योरावास भूमिः विशेषतो भूस्वामी वेङ्कटशास्त्री चतुर्थः आचार्येण साकं पञ्चाग्नय इव ते वेदीमलञ्चक्रुः।

वैदिकैर्मन्त्रैरधियित्वा घनापठीत्वेवमवोचत्। सार्धघटिकाद्वये काले बालकोयमेकं काव्यबन्धंकरोतु इति। तदेव वाक्यमनुवदन् गुरूः पाण्डव धार्तराष्ट्रजननेनैव कथावस्तुना भाव्यमित्यनुमोदमावेदयाञ्चक्रे। तस्मिन्नेव काले माणवकविरचितमिदं काव्यम् घण्टापरिमिते काले समाप्तिमयासोत्। स माणवक एव विश्वविख्यातः कवीनां कविः गणपतिमुनिः। तदेव काव्यं सरससहृदयाह्लादं जनयति। बालव्युत्पत्तये बुधभोगक्षममनवद्यं चेति मत्वा तत् व्याख्यास्यते। सहृदयाः विदाङ्कुर्वन्तु। काव्यञ्च विजयतेतराम्।

इति,

वासिष्ठो नरसिंहशर्मा.

* श्रीः *

* पाण्डवधार्तराष्ट्रसम्भवम् *

[रचयिताः- काव्यकण्ठ गणपतिमुनिः]

"मङ्गलश्लोकः"

१) जगद्गुरूनहं वन्दे ब्रह्मविष्णुमहेश्वरान् ।
वाणीलक्ष्मीशिवानाथान् सृष्टिस्थित्यन्तकारिणः।

व्याख्या— निर्विघ्नपरिसमाप्त्यर्थं आदौ इष्टदेवता नमस्कारः क्रियते । सृष्टिस्थित्यन्तकारिणः वाणी लक्ष्मीशिवानाथान् ब्रह्मविष्णुमहेश्वरान् जगद्गुरुन् अहंवन्दे । आत्मरूपात् पुरुषोत्तमात् गुणत्रयावभा गाय सृष्टयादिकार्यकरणाय च मूर्तित्रयोत्पत्तिः । तेषां स्वकर्माचरणे या शक्तिः सैव वाण्यादिशब्दै रभिधीयते । सा च शक्तिः स च शक्तः तयोः प्रादुर्भावः कर्म च दिव्यमेव । "जन्म कर्म च मेदिव्य" मित स्मृतेः । स्वशक्तिसंयुताः ब्रह्मविष्णुमहेश्वराः स्वकर्माचरणे प्रवृत्ताः तेनैव व्यापारेण "स्वकर्माचरण-मेवश्रेयः" इत्युपदिशन्ति "स्वे स्वे कर्मण्यभिरतः संसिध्दिं लभते इतोदं गीतावचनमत्र मानं भवति । तस्मात्तेगुरवः । अवितरसाधारण कर्माचरणत्वेन

अस्मज्जन्मादि कारणत्वेन च तेगुरवः। तस्माद्वन्द्याः। एतदेव विभूतिद्वारा कृतमुपासनं। कर्तृगतनमस्क्रिया-कर्मत्वेन ब्रह्मादीनां द्वितीया। "जगद्गुरूनहं वन्दे" इत्यत्र प्रसादः। जगद्गुरूनित्यत्रबन्धस्यगाढत्वम्। अहं वन्दे इत्यत्र शैथिल्यं। तयोस्संप्लवश्चात्रदृश्यते। ब्रह्मविष्णुमहेश्वरानित्यत्र कान्तिः। अर्थस्य विमलत्वात् प्रसादो नामार्थगुणः। वैदर्भीरीतिः। द्राक्षा पाकः। कैशिक्याख्या वृत्तिः। अनुष्टुप् छन्दः श्लोकापर नामकं श्लोकेषष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमं। द्विचतुष्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः"। इतितल्लक्षणात्। वन्दे वदि अभिवादनस्तुत्योः इत्यस्माद्धातोः आत्मने पदिनः लटि उत्तमपुरुषैक वचनम्॥

1) यशोभिर्दिगिभश्रेणदन्तकान्तिमलिम्लुचैः।
मण्डितः पाण्डुरित्यासीद्भारतो भारते नृपः॥

व्या—दिगिभश्रेणीदन्तकान्तिमलिम्लुचैः दिगिभानां श्रेणी तस्याः दन्तकान्तिः तस्याः मलिम्लुचैः दिग्गजानामपि दन्तकान्ति मपहरद्भिः एतेन दिगन्तव्याप्तत्वं कीर्तेः मूच्यते। अमलत्वं च व्यज्यते। यशोभिः कीर्तिभिः मण्डितः अलङ्कृतः पाण्डुरिति पाण्डुरिति प्रसिद्धः स्वकीर्त्यासितः तस्मा दपि पाण्डुरिति भावः। भारते तन्नामके वर्षे एतेन तस्य वर्षाधिपत्यं सूचितं।

भरतखण्डेवा भारतः = भरतवंशजः नृपः राजा आसोत् = बभूव । "यशोभिर्दिगिभश्रेणी" इति भकारद्वयन्यासः "दन्तकान्ति" रिति न्तकारद्वयन्यासः मण्डितः पाण्डु रिति बिन्दुपूर्वकडकारावृत्तिः तस्मादत्र अनुप्रासो नाम शब्दालङ्कारः श्रोत्रसुखावहः । भारतो भारते इति यमकम् । उपमा आर्थालङ्कारः। पाण्डोः प्रथम निर्देशादस्यैव राज्याधिकारोस्त्विति द्योत्यते भरतशब्देन महाकुलीनता सूच्यते । मण्डितः पाण्डुरित्यत्र माधुर्यम् । प्रथमार्धे कान्तिः । द्वितीयार्धे पदानां लोलायमानत्वादुदारता । यशोभिर्मण्डितः पाण्डुरिति समाधिर्नामार्थगुणः । दन्तकान्तिमलिम्लुचैः इत्यत्र वक्रोक्तिरिति वामनः । सादृश्याल्लक्षणा वक्रोक्तिरिति ।।

२) तस्य सर्वागमज्ञस्य प्रज्ञयैव विलोचनो ।
धृतराष्ट्र इति भ्राता ज्येष्ठः श्रेष्ठमतेरभूत् ।।

व्याख्या—श्रेष्ठमतेः=धीरधिषणस्य सर्वागमज्ञस्य= सर्वशास्त्र विशारदस्य तस्य=पाण्डोः प्रज्ञया एव= प्रज्ञा मात्रसाहाय्येन विलोचनो=नेत्रवान् (प्रज्ञाचक्षूः अक्ष्णा काणश्च) प्रज्ञया सर्वं पश्यतीत्यर्थः तथापि नैव शास्त्रचक्षूः इति च सूच्यते तदेतत् भविष्यत्कथासूचकं भवति । वर्तमानेतु प्रज्ञया कानिष्ठमपि

शासितवान् राजकार्येष्वित्यपि व्यज्यते। तस्मादेव धृतराष्ट्र इति ख्यातिः। ज्येष्ठः भ्रता ज्येष्ठः पूर्वजः अभूत = बभूव किल। द्वितीयपादे मसृणत्वरूपः श्लेषः। अन्यत्र प्रसादः ज्येष्ठ श्रेष्ठः इत्यत्र अनुप्रासः। फौढार्थत्वादोजो नामार्थगुणः। वैमल्यात्प्रसादः। क्रमकौटिल्यानुल्बणत्वोपपत्तियोगात् श्लोषः। उक्ति वैचित्र्यान्माधुर्यम्। श्रेष्ठमतिरिति साभिप्रायं विशेषणम्॥

3) पूर्वजेनामुनापाण्डोः परिणीता गुणोन्नता।
सुबलस्य सुता राज्ञः गान्धारो नाम सुन्दरी॥

व्याख्या— पाण्डोः पूर्वजेन=अग्रजेन अमुना=धृतराष्ट्रेण विवाहसमये पाण्डोः पूर्वमेव पाणिग्रहणं कृतवानिति शास्त्रमर्यादां निरूपयितुमाह पूर्वजेन परिणीता इति सुबलस्य=तन्नाम्नः राज्ञः=नृपस्य सुता=दुहिता गान्धारी नाम सुन्दरी रूपवतो नाम्ना गान्धारीति विश्रुता गुणोन्नता = गुणसम्पन्ना कन्या परिणीता=विवाहिता न केवलं सुन्दरी गुणैरपि श्लाघ्या। परिणीता-गुणोन्नता इत्यत्रानुप्रासः। पदानां विनिमयासहिष्णुत्वं दृश्यते। एवमन्यत्रापि शय्या ग्राह्या परिणीता परिपूर्वकान्नयतेः कर्मणिक्तः॥

4) सा रामा यौवनारम्भे किञ्चित्परिचितानपि।

जनुषान्धं पतिं प्राप्य विसस्मारेवविभ्रमान् ॥

व्याख्या-सा रामा=सा सुन्दरी गान्धारी जनुषान्धं= नेत्रहीनं पतिं=भर्तारं प्राप्य=अवाप्य यौवनारम्भे= बाल्यात्परे वयसि किञ्चित्परिचितानपि=वयसासह सञ्जानानपि यौवन सहजान् तत्कालसम्भवानपि विभ्रमान्=नेत्रविलासादिकान् विसस्मारेव=विस्मृतेवाभवत्। पिहितलोचनाऽभूदिति भावः। अनेनास्याः पातिव्रत्यं व्यज्यते। किञ्चित्परिचिता नपोत्यनेन नातिसम्पूर्णतारुण्ये उद्वाहितेति ध्वन्यते। अप्रकटीकरणमेव विस्मरणमित्येवकारार्थः। विसस्मार विपूर्वकात् स्मृ.चिन्तायां इति धातोः परस्मैपदिनः कर्तरिलिटि प्रथमपुरुषैकवचनम् ॥

5) यादवो यामिनीनाथवदना काचिदङ्गना।

काले तस्मिन्पृथा नाम पृथिवीमण्डले बभौ ॥

व्याख्या— ज्येष्ठानुक्रमेण विवाहस्संवृत्त इत्याह यादवीत्यादिना। तस्मिन् काले=ज्येष्ठोद्वाहसमये पृथिवीमण्डले भूमण्डले एतेन पृथिव्यां चद्रदर्शनेन तां दृष्टवा देवकन्येति राजानो बभ्रमुः इति व्यज्यते। यादवो यदुवशजा यामिनोनाथवदना = चन्द्रमुखी यामिन्याः रात्र्याः नाथः चन्द्रः तत्सदृशं वदनं मुखं यस्याः साः। काचित्=अनिर्वचनीयशोभादिगुणयुता

अङ्गना=कन्या बभौ=रेजे भा.दीप्तौ लिट् । यादवीति महाकुलीनेति ख्यापनार्थम् । यादवी यामिनीत्यनुप्रासः एवमेव पृथापृथिवीति। यादवी यामिनीनाथवदनेति व्यासोक्त्या अर्थस्य प्रौढिः ओजो गुणः।। पृथाशब्दश्चात्रपृथिव्यवतारत्वद्योतकः । एतदेव भारतचरित्र परिक्षाग्रन्थे विस्तरेण प्रदर्शितम्भूत् । यादवीति सौशब्द्यद्योतकः पदविन्यासः । बदना अङ्गना इत्यनुप्रासः ।

6) ससख्ये कुन्तिभोजाय शूरश्शूरवरः पिता ।
प्रददौ दुहितृत्वेन प्रीतिं मूर्तिमतीमिव ॥

व्याख्या—शूरवरः=वीरश्रेष्ठः शूरः शूरोनाम सः=तादृशः पिता=जनकः सख्ये=मित्राय कुन्तिभोजाय तन्नामकाय राज्ञे दुहितृत्वेन=पुत्रीत्वेन मूर्तिमतीं=तनु धारिणं प्रीतिमिव=प्रेमरसमिव प्रददौ= समर्पितवान् । प्रपूर्वकात् ददातेः लिट् कन्यायाः पुत्रीत्वेन स्वीकरणं काले तस्मिन् दृश्यते । शान्ता नामकन्या दशरथेन दत्ता।ऽभूदितिश्रीमद्रामायणादवगम्यते। शूरश्शूर इति यमकम्। प्रीतिं मूर्तिमतोमिवेत्युत्प्रेक्षा। कुन्तिभोजायेति संप्रदाने चतुर्थी ।।

7) अमुष्यैकिलसन्तुष्टो दुर्वासाः परिचर्यया ।
विद्यामुपदिदेशैकां देवानयनदूतिकाम् ।।

व्याख्या — अमुष्यै = कन्यायै कुन्त्यै परिचर्यया = सेवया सन्तुष्टः = प्रीतः दुर्वासाः = दुर्वासा नाम मुनिः देवानयनदूतिकां = इष्टदेवतासमानयने दूतीमिव चेष्टमानं एकां विद्यां = कमपि मन्त्रविशेषं उपदिदेश-किल = प्रददात्रिति भावः । रूपकालङ्कारः । शृङ्गारे सहायाः दूतिकादयः प्रसिद्धाः । एतेन देवानयनस्य पुत्रलाभएव प्रयोजनमिति व्यज्यते । एकामिति साभिप्रायं विशेषणं किलशब्दः ऐतिह्यद्योतनार्थकः भूतानुवादकश्च। उपदिदेश उपपूर्वकात् दिश. अति-सर्जने इत्यस्मात् धातोः कर्तरिलिट् ।

8) नसा मित्रं वशीचक्रे केवलं विद्यया तया ।
केतकीकलिकाकान्तैः कोमलैरङ्गकैरपि ॥

व्याख्या— सा = पृथा तया = विद्यया = मुनिदत्तया-विद्यया केवलं, मित्रं = आदित्यं न वशीचक्र = केवल-याविद्यया मित्रः नैव वशमागतः वशीकरणे अन्योपि हेतुरस्ति तमेव निरूपयितुमाह. केतकीकलिकाकान्तैः केतक्याः कलिकावन्मनोहरैः कोमलैः = मृदुभिः अङ्ग-कैरपि अवयवैरपि मित्रं वशी चक्रेति पूर्वेणान्वयः । तस्मादेव वरप्रदानादि सङ्गच्छते । अनेनास्याः सौ-भाग्यातिशयः सूच्यते । कलिकेति पदविन्यासात् पृथायाः अप्रगल्भवयस्त्वं सूच्यते। तथापि कान्तैरिति

विशेषः। उपमालङ्कारः। मित्रमिति साभिप्रायं पदम् मुग्धा सौन्दर्यवती स्फुटः सहोक्तिः। यथाविद्यया तथा कोषलैरङ्गकैरपीत्यौपम्यं गम्यते। निर्णीते केवलमित्यव्ययत्वं। सूर्यार्थे मित्रशब्दस्य पुंस्त्वं, "द्युमणिस्तरणिर्मित्रः" इति कोशात्।।

9) सुतं सहजवर्माणं लब्ध्वा राजीव बन्धुतः।
कलङ्कशङ्किता सद्यः सा मुमोच सहाश्रुभिः।।

व्याख्या— सा=पृथा राजीवबन्धुतः=पद्मबान्धवात् सूर्यात् सहजवर्माणं=सहजकवचधारिणं सुतं=कुमारं कर्णाख्यं लब्ध्वा=प्राप्य कलङ्कशाङ्किता=कन्यात्वे पुत्रजन्मना स्वापराधस्स्फुटी भवति. तादृशशीलशङ्कया कलङ्कितामात्मानं मन्यमाना सद्यः = तस्मिन्नेवक्षणे अश्रुभिः सहः = पुत्रत्यागजनितनेत्राम्बुभिः सह मुमोच =तत्याज। अश्रुभिः सहेति सहोक्त्यलङ्कारः। मित्रः राजीवबन्धुः इत्याभ्यां वचनाभ्यां सूर्यस्य सस्नेहत्वं बन्धुप्रीतियुतत्वं च व्यज्यते। सहजवर्माणमिति (पुत्रस्य असाधारण) पुत्रीयासाधारणमहानुभावद्योतकं लक्ष्म। स्वयमकलङ्कितापि लोकापवादाद्भीतेति मावः। आर्षप्रभावाद्दोषराहित्यं स्फुटमेव कलङ्क शङ्कितेति अनुप्रासः। तत्याज, त्यज. हानौ-इत्यस्माद्धातोः लिट्।।

10) कुन्ती वासन्तिकामुक्तं राधाधात्रीभृतं ततः ।
सूर्यसूनुप्रसूनं तद्वीरश्रीश्शिरसा दधौ ॥
व्याख्या— कुन्तीति वासन्तिका कुन्दलता तया मुक्तं =कुन्त्यां वासन्तिकारोपः तया त्यक्तं राधैव धात्री तया भृतं राधारूपया धात्र्या सम्भृतं धात्रीति भुवा उपमात्राचेति भावः । "धात्री जनन्यामलकी वसुमत्युपमातृषु" इत्यमरः अथवा धात्रीनामकभुज-विशषेण वर्धितं तत् सूर्यसूनु प्रसूनं सूर्यसूनुः कर्णः सएव प्रसूनं सूर्यपुत्रपुष्पमिति यावत् वीरश्रीः = वीरलक्ष्मीः शिरसा=उत्तमाङ्गेन दधौ=दधार पुष्प-वद्वीरमौलिलालनीयोऽभवत्, सः वीरश्रियमप्य-लञ्चकारेति भावः। सावयवरूपकां धात्रीत्यत्रश्लेषः। वैदर्भीरीतिः । दधौ (डु) धाञ् धारणपोषणयोः इत्यस्मात् धातोः कर्तरि लिट् ॥
सूर्य सूनुरिति प्रतापातिशय द्योतनार्थम् ।

11) कुन्त्याः कान्त्याजितरते स्त्विषां पत्युरनुग्रहात्।
नैवाभ्रश्यत कन्यात्वं न चाक्षीयत यौवनम् ॥
व्याख्या— त्विषां पत्युः=सूर्यस्य अनुग्रहात्= करु-णया कान्त्या जितरतेः = देहसौन्दर्येण रतिमपि जितवत्या कुन्त्याः = कुन्तिभोजकुमार्याः कन्यात्वं कन्यकात्वं नैवाभ्रश्यत=नैव दूषितमभूत् यौवनंच=

तारुण्यमपि नाक्षीयत=नैव गलितमभूत् । भगवत-स्सवितुरनुग्रहान्नैवानाप्तव्यमस्ति इति भावः । अभ्र-श्यत–भ्रम्शु अवसंसने कर्मणिलङ् । अक्षीयत. क्षि. क्षये इत्यस्माध्दातो कर्मणि लङ. ।। अनुग्रहादिति तृतीयार्थे पञ्चमी । अनुग्रहेणेति विभक्तिपरिणामो वा कार्यः। यद्वा अक्षीयत, अभ्रश्यत इति कर्मकर्तरि लडि. रूपे।। अक्षीयत अभ्रश्यत इति क्रियापदानुसारं।

12) दत्ता सा कुन्तिभोजेन पाण्डुना जगृहे करे ।
दत्तः कुसुमबाणेन तया पाण्डुस्तु चेतसि ।।

व्याख्या—कुन्तिभोजेन दत्ता सा पाण्डुना करे जगृहे. कुसुमबाणेन=सुमास्त्रेण मन्मथेन दत्तः पाण्डुं तया= कुन्त्या चेतसि=मनसि जगृहे=गृहीतः सा मनसिजेन प्रेरिता पाण्डुं मनसा वव्रे इति भावः । वव्रेइत्येनन कुन्त्या यदृच्छया कृतोप्यपराधः न तस्याश्चेतसि चिरात्प्रतिष्ठामलभतेति सुष्ठु ध्वन्यते । पूर्वोत्तरार्ध-योरौपम्यं व्यज्यते। तत्र दत्तशब्दावृत्या यमकमिति दण्डया दयः। जगृहे गृह. उपादाने इतिधातोः कर्मणि लिट् प्रथमपुरुषैकवचनम् ।।

13) अन्तं प्रविश्य भूजानेर्बालसारङ्गलोचना ।
चरणालक्तकेनेव रक्तं चेतश्चकार सा ।।

व्याख्या— बालसारङ्गलोचना = बालसारङ्गस्य-

लोचने इव लोचने यस्याः सा तथोक्ता निदर्शना एक-
हायनकुरङ्गलोचना कुन्ती भूजानेः=भूः जाया यस्य
तस्य राज्ञः पाण्डोः अन्तः=अन्तः पुरे हृदये च प्रवि-
श्य चरणालक्तकेनेव = पादलाक्षारसेनेव=चेतः=
राज्ञः चित्तं रक्तं =रक्तवर्णसंयुतं प्रासादपक्षे (राज्ञः
पक्षेतु) अनुरक्तं चकार=अकरोत्। अन्तः पुरप्रवेश-
काले पदवी अलक्तकाङ्का बभूव। एतेनास्याः प्रसाधन-
चातुर्यं व्यज्यते। राजापि पद विन्याससौभाग्येन
रञ्जितचित्तो बभूव। एवमेववदन्ति–"किं वा कवि
तया राजन् किं वा वनितया तया। पदविन्यास
मात्रेण मनो नापहृतं तया"।। इति। एतेन पदवि-
न्यास सौन्दर्यमपि निरूपितं भवति। चरणालक्त-
केनेवेत्युत्प्रेक्षा अन्तः इत्यत्र श्लेषः। अन्तः पुरेति
वक्तव्ये नामैकदेशेन पूर्णनामग्रहणम्ह्यम्। श्लेषादि-
स्थलेषु सुतरांदोषाभावः अलक्तक रक्तमिति अनु-
प्रासः। यथा अन्तः पुरे तथा भूजानेर्हृदयेपीति
ध्वन्यते। भूजानेरिति साभिप्राय पदविन्यासः।

14) कन्याचान्या महेशेन माद्रो भद्रेभगामिनी।
परणीता परिणतप्रालेयकिरणानना॥

व्याख्या– महीशेन=राज्ञा पाण्डुना भद्रे भगामिनी=
गजगमना परिणतप्रालेयकिरणानना परिणतश्चासौ

प्रालेयकिरणश्च प्रालेयकिरणः चन्द्रः तद्वदाननं यस्या सा पूर्णचंद्रमुखी माद्री=मद्रदेशाधिपतेः सुताः कुलौन्नत्यद्योतकं वचनम् । अन्या च कन्या=अपरा च वधूः परिणीता = उद्वाहिता । वैदर्भी रीतिः । उपमालङ्कारः । भद्रे भ, प्रालेयकिरण शब्दग्रहण-सामर्थ्यात् अस्य राज्ञः गजबलाढ्यत्वं छत्रचामरादि-राजलाञ्छसम्पत्तिश्च द्योत्यते । द्योत्यतेचास्यपुन-श्चन्द्रवंशोभिजनत्वमपि ।।

15) कतिचिद्वत्सरान्कान्ते तेद्वे विश्वम्भरामपि ।
दाक्षिण्येन सदीर्घाक्षो बभुजे मनुजेश्वरः ।।

व्याख्या— दीर्घाक्षः = विशालनेत्रः सः मनुजेश्वरः राजा पाण्डुः कतिचित् वत्सरान् =कानिचन वर्षाणि ते द्वे कान्ते=कुन्तीमाद्रयौ विश्वम्भरामपि भुवमपि दाक्षिण्येन=सामर्थ्येन दक्षिणनायकौचित्याच बुभुजे भुक्तवानित्यर्थः । बुभुजे. भुजपालनाभ्यवहारयोः कर्तरि लिट् ।।

16) जहार मृगयादूरं महीदारं तमेकदा ।
सकृन्निषेवितमपि व्यसनं हि पराभवेत् ।।

व्याख्या— महीदारं=भूजानिं तं पाण्डुं एकदा=कदा चित् मृगया=आखेटः दूरं=सुदूरं जहार आचकर्ष व्यसनं =अकार्यं सकृत्=एकवारं निषेवितमपि

अनुष्ठितमपि पराभवेत् = पराभवहेतुर्भवतिहि । अर्थान्तरन्यासालङ्कारः । अनुप्रासश्च । जहार. हृञ्-हरणे कर्तरि लिट् ।।

17) क्रीडन्तं मृगसुन्दर्या स मुनिं मृगभूमिकं ।
पाण्डुर्जघान बाणेन स पाण्डुं घोरया गिरा ।।

व्याख्या— सः पाण्डुः मृगभूमिकं = मृगरूपधारिणं मृगसुन्दर्या = मृगरूपधारिण्या भार्यया क्रीडन्तं = विहरन्तं मुनिं = तापसं बाणेन = शरेण जघान = अहन् सः = मुनिः पाण्डुं = राजानं घोरया = भयङ्कर्या गिरा = वाचा जघान शशापेति भावः। तुल्ययोगितालङ्कारः । "वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगितेति" लक्षणात् जघान हनहिंसागत्योः कर्तरि लिट्।

18) अनुभूय भवान्कान्तामन्तं दिष्टस्य यास्यति ।
चञ्चरीक इवाघ्राय चाम्पेयकलिकामिति ।।

व्याख्या— भवान् त्वं कान्तां = प्रियां अनुभूय = भुक्त्वा दिष्टस्य = भागधेयस्यायुषः चाम्पेयकलिकां = चम्पक कोरकं आघ्राय = आस्वाद्य चञ्चरीक इव = भ्रमर इव अन्तं = अवधिं नाशमिति यावत् । यास्यति = गमिष्यसि । भवच्छब्दयोगात् "शेषेप्रथमः" इति प्रथमपुरुषः । चञ्चरीकः = नित्यभ्रमणशीलः अतएव चपलस्वभत्वात् यदा कदाचिन्निषिध्दमपि प्रियापरि

भोगमाचरेः मृत्युमुखकवलतां प्राप्नोत्येवेति निगूढोभ्रिप्रायः उपमालङ्कारः । श्लेषो गुणः । अनुप्रासः।।

19) अथासारं भवं बुध्वा बन्धुन्यस्तधराभरः।
सतीभ्यां सहपत्नीभ्यां पाण्डुः प्रव्रजितो वनम्॥

व्याख्या— अथ=शापश्रवणानन्तरं पाण्डुः=राजा बन्धुन्यस्तधराभरः = वैराग्येण ज्ञातिनिक्षिप्तराज्यः भव संसारं असारं =निस्सारं बुध्वा=ज्ञात्वा सतीभ्यां प्रतिव्रताभ्यां पत्नीभ्यां सह = भार्याभ्यां साकं वनं =अरण्यं प्रवजितं ययानिति भावः । ओजो नामार्थगुणः । अनुप्रासः । सतीभ्यामिति साभिप्रायं वचनम् । पत्नीभ्यां सहेति सहशब्दयोगात् "सहयुक्तेऽप्रधाने' इति पत्नीशब्दात् तृतीया ।

20) श्रुत्वा तत्र महर्षिभ्यो नापुत्रो गातिमानिति ।
राजा क्षेत्रजसन्तत्यै कुन्त्या साकममन्त्रयत् ।।

व्याख्या— महर्षिभ्यः=मुनिभ्यः तत्र=वने नापुत्रो गतिमानति=अपुत्रस्य गतिर्नास्तीति श्रुत्वा=विज्ञाय राजा = पाण्डुः क्षेत्रजसन्तत्यै = क्षेत्रजपुत्र प्राप्त्यै कुन्त्यासाकं =पृथयासह अमन्त्रयत्=समालोचनं चक्रे लोकोक्तिर्नामालङ्कारः । दशविधपुत्रेषु क्षेत्रजोप्येकः। ओजोनामार्थगुणः । अमन्त्रयत् मत्रि. गुप्तभाषणेति धातोः चौरादिकाद् कर्तरि लड् ।

21) अथालिकुन्तला कुन्ती बहुपुत्राभिलाषिणः।
कौमारोपार्जितां विद्यां भेजे भर्तुर्निदेशतः।।
व्याख्या– अथ=मन्त्रणानन्तरं बहुपुत्राभिलाषिणः= सन्तानवृध्दिमपेक्षितवतः भर्तुः पाण्डोः निदेशतः= आदेशेन कौमारोपार्जितां=बाल्ये दूर्वाससः सकाशादार्जितां विद्यां=देवानयनक्षमां मन्त्रविद्यां भेजे= सिषेवे. उपमालङ्कारः। भेजे. भज.सेवायां आत्मनेपदी लिट् ।।

22) तस्यां युधिष्ठिरो नाम धर्माद्विद्याबलागतात्।
क्षेमाय क्षितिलोकस्य पुण्यश्लोकः सुतोजनि ।।
व्याख्या—विद्याबलागतात् = विद्याप्रभावेणागतात् नतु कामवशेन। धर्मात्=यमात् तस्यां = कुन्त्यां क्षितिलोकस्य भूलोकस्य क्षेमाय=शुभाय पुण्यश्लोकः सुचरितः युधिष्ठिरो नाम=धर्मज इति सुतः अजनि अजायत अभवत्। अनुप्रासः। सर्वत्र सौशब्द्यमस्ति अजनि जनि. प्रादुर्भावे. इति धातोरात्मनेपदिनः लुङ्. प्रथमपुरुषैकवचनम् ।।

23) गजायुतबलं पश्चादवाप गजगामिनी।
पृथुनेत्रं पृथा पुत्रं भीमं नाम समीरणात् ।।
व्याख्या— पश्चात्=धर्मजजननानन्तरं गजगामिनी मत्तेभगमना पृथा=कुन्ती समीरणात्=मातरिश्वनः

प्रभावत् गजायुतबलं = दशसहस्रनागबलंसम्पन्नं पृथुनेत्रं=दीर्घाक्षं भीमं नाम=भीमसेन नामानं पुत्रं=कुमारं अवाप=प्राप्नोत्। अनुप्रासालङ्कारः भीमजनि प्रत्यपादानत्वात् समीरणशब्दात्पञ्चमी।

24) अर्जुनं तनयंप्राप वज्रपाणेरियं ततः।
प्रसादं हरितां पङ्क्तिः प्रमोदं मरूतां ततिः॥

व्याख्या— इयं=कुन्ती ततः=भीमादनन्तरं वज्र पाणेः इन्द्रात् अर्जुनं अर्जुननामानं तनयं=पुत्रं आप= प्राप। हरितां पङ्क्तिः=दिशां समुदायः प्रसादं = नैर्मल्यं मरुतां ततिः देवसमुदायः प्रमोदं च=सन्तोषं आप प्राप. तुल्ययोगितालङ्कारः। अनुप्रासः। समता-नाम गुणः। वैदर्भीरीतिः।

25) अपि सर्वगुणोपेतै र्नातृप्यत्त्रिभिरात्मजैः।
दिदृक्षुः पुत्रपूर्णाङ्कां माद्रीमपि महीपतिः॥

व्याख्या—सर्वगुणोपेतैः सर्वसद्गुणभूषितै = त्रिभिः त्रिसङ्ख्याकैः आत्मजैरपि पुत्रैरपि महीपतिः=भूपतिः माद्रीमपि=द्वितीयामपि पुत्रपूर्णाङ्कां=अङ्कारूढपुत्रां दिदृक्षुः=द्रष्टुमिच्छुः नातृप्यत् = पुत्रत्रयेणापि न सन्तुष्टोऽभूत् अनेनास्य दाक्षिण्यं व्यज्यते। अतृप्यत् तृप प्रीणने इति धातोः दैवादिकात् कर्तरि लङ्॥

26) सद्वेशवंशनन्दिन्यै मेदिनी भर्तुराज्ञया।

विततार पृथादेवी विद्यां देववशङ्करीम् ।।

व्याख्या— मेदिनी भर्तुः = भूभर्तु पाण्डोः आज्ञया = आदेशेन पृथादेवी = कुन्ती मद्रेशवंशनन्दिन्यै = माद्र्यै देववशङ्करीं = देवप्रसादकरीं विद्यां = मन्त्ररूपां विद्यां विततार = ददौ उपदिदेशत्यर्थः। विततार–विपूर्वकात् तॄ प्लवनतरणयोः इति धातोः कर्तरिलिट्। अत्र उपदेशक्रियोद्देश्यत्वेन माद्र्या संप्रदानत्वाच्चतुर्थी ।।

27) दस्राभ्यां दयमानाभ्यां धरणीन्द्रवधूरसौ ।
नकुलं सहदेवं च सुतावाप सतीमणिः ।।

व्याख्या— सतीमणिः असौ धरणीन्द्रवधूः = माद्री दयमानाभ्यां = मन्त्रेण प्रसन्नाभ्यां दस्राभ्यां नासत्याभ्यां नकुलं सहदेवं च सुतौ = तन्नामकौ पुत्रौ आप = प्राप। अनुप्रासालङ्कारः। प्रसादः गुणः। दस्रौ अश्विनीकुमारौ। "नासत्यावश्विनौ दस्रौ" इत्यमरः ।। आप. आप्लृ व्याप्तौ इति धातोः कर्तरि लिट् प्रथमपुरुषैकवचनम् ।।

28) धृतराष्ट्रवधूर्गर्भं कुन्त्याः प्रागेव गर्भिणी ।
चिरं सन्ततिमप्राप्य जघान किल मुष्टिना ।।

व्याख्या— कुन्त्याः पृथायाः प्रागेव = पूर्वमेव गर्भिणी दौहृदलक्षणा। धृतराष्ट्रवधूः = गान्धारी चिरं = चिरात् सन्ततिं = सन्तानं अप्राप्य = अलब्ध्वा हेत्वर्थेल्यप्.

मुष्टिना = संवृताङ्गुलिपाणिना गर्भं=ब्रूणं जघान ताडयामास ।। जघान. हन. हिंसागत्योः इति आदादिकात् कर्तरि लिट् ।।

29) फलिते शतधा गर्भे पतिते धरणीतले ।

आसन् व्यासप्रसादेन शकलाः शतमर्भकाः ।।

व्याख्या— फलिते=प्रसवोन्मुखे गर्भे=ब्रूणे शतधा अनेकधा धरणीतले = भूतले पतिते = निपतितेसति शकलाः = खण्डाः शतमपि व्यासप्रसादेना = व्यासानुग्रहेण शतमर्भकाः=बालाः शंतसंख्याकाः आसन् = अभूवन् । प्रसादः श्लेषश्च । शतधाशतशब्दात् "सङ्ख्यायाः विधार्थे धा" इति धाप्रत्ययः ।

30) सर्वक्षत्रक्षये हेतुर्येषां दुर्योधनो मुखं ।

दुश्शासनो विकर्णश्च येष्वन्यौ मूर्खपण्डितौ ।।

व्याख्या— येषां=बालकानां सर्वक्षत्रक्षये हेतुः=सर्वराजन्यनाशे कारणभूतः दुर्योधनः मुखं ज्येष्ठ इति भावः । येषु डिम्भकेषु. अन्यौ = इतरौ दुश्शासनः विकर्णश्च क्रमात् मूर्खपण्डितौ अभूतामिति शेषः । क्रमालङ्कारः। अत्र प्रसिध्दानामेव परिगणना कृता।।

31) सर्वक्षत्रक्षये हेतोः धार्तराष्ट्रस्य जन्मनि ।

न वात्यया केवलया जगद्भीत्या च कम्पितम् ।

व्याख्या—सर्वक्षत्रक्षये = सर्वराजन्यविनाशेहेतोः=

कारणस्य धार्तराष्ट्रस्य=धृतराष्ट्रसुतस्य दुर्योधनस्य जन्मनि=जननकाले केवलया वात्यया=अप्रसन्नमारुतेन केवलेन जगत् = विश्वं न कम्पितं = किन्तु भीत्या च भयेन च कम्पितमभूत्। तीव्रमारुतेन भयेन च कम्पितमभूत्। अत्रोपमा व्यज्यते। कौरवजन्मप्रसङ्गे एतादृशान्यपशकुनानि विश्वस्य विनाशपिशुनानि भारतेपि वर्णितानि। सज्जनावतरणे प्रसादचिह्नानि सुखावहवातस्पन्दमादीनि च वर्णितानि दृश्यन्ते धर्मजार्जुनजनावसरेपि कविना सूचितानि तानि पश्यन्तु। अनुप्रासालङ्कारः। सहोक्तिश्च। वैदर्भी रीतिः।

82) खण्डोपरश्चन्द्रखण्ड निर्विशेषालिकस्थली।

अभूत्किल कुलज्योत्स्ना दुश्शला नाम कन्यका॥

व्याख्या— अपरः खण्डः = शतादधिकः चन्द्रखण्ड निर्विशेषालिकस्थली=चन्द्रस्य खण्डः तद्वत् विशेषरहितं अलिकस्थलं यस्याः सा अर्धचन्द्र सदृशालिका कुलज्योत्स्ना=वंशस्य चन्द्रमरीचिका दुश्शला नाम कन्यका=कन्या अभूत्किल बभूवखलु॥ कुलज्योत्स्नेति निर्मल ज्योत्स्ना सादृश्यस्वीकारात् एतदुक्तं भवति। पुत्राणां शतेनापि जातेन यत्प्रतिष्ठां नाविन्दत तत्कौरवं कुलं एकेनापि दौहित्रेण अभिजातेन

अविन्दत। "वरमेको गुणी पुत्रः न तु मूर्खशतादपि" इति न्यायोपि लौकिकः अत्र सङ्गच्छते। उपमालङ्कारः समोपमा। तस्मादेव कुलज्योत्स्नेति सङ्गच्छते। रूपकालङ्कारः। रूपकातिशयोक्तिरिति केचित्। कुलज्योत्स्नेत्यध्यवसानात्। अनुप्रासालङ्कारः॥

३४) ते बालका ववृधिरे नगरे वनेच मूर्धाभिषिक्त
मुनिपुङ्गवलाल्यमानाः।
कौतूहलेव च मुनेः कलहप्रियस्य लोकस्य
लोचनवतः सममुत्सवेन॥

व्याख्या— ते बालकः धार्तराष्ट्राः पाण्डवाश्च नगरे पट्टणे वने च=विपिने च मूर्धाभिषिक्त मुनिपुङ्गवलाल्यमानाः = राजन्यैः तपस्विभिश्च उपलालितास्सन्तः कलहप्रियस्य=मुनेः नारदस्य कौतूहलेव च= विनोदेनसह लोचनवत चक्षुष्मतः लोकस्य=जनस्य उत्सवेन समं=कौतूहलेनसाक ववृधिरे अभिवृध्दमापुः। ववृधिरे वृ धु. वृध्दौ इत्यस्माध्दातोः आत्मनेपदितः कर्तरि लिट् प्रथमपुरुषबहुवचनम्॥

कौरवाः नगरे राजन्यैः लाल्यमानाः पाण्डवाः वने लाल्यमानाः इति क्रमेण अन्वयात् क्रमालङ्कारः उत्सवेन सममिति सहोक्तिरलङ्कारः।

भारतयुध्दद्योतकं मुनेः कौतूहलं भवति। नेत्रवतां जनानां दर्शनीयाः नेत्रसाफल्यहेतवइवकुमाराः बभूवुः

इति भावः । नेत्रवतास्त्यनेन पित्रोर्लोचनोत्सवो निषिध्दः । कौरवपक्षे अन्धयोः विनाशपिशुनापशकुनादिभिः स्थापितस्यान्तश्शल्यस्य समुध्दरणसमर्थस्य नायकस्याभावादिति भावः। जगच्छब्देन काव्यस्यारम्भः । उत्सवनेति परिसमाप्तिः । स्पृहणीयः ववृधिरे इति क्रियान्तं काव्यम् यशोभिरित्यारब्धं च । तदपि आलोचनीयं भवति शोभाहेतुत्वात् । वसन्ततिलकावृत्तम् । "उक्ता वसन्ततिलकातभजाजगौगः" इति लक्षणात् । पादान्ते गुरुत्वमूह्यम् । अथवा मिश्रवृत्तत्वमिति बोध्यम् । प्रथमे चरणे वने वा इति तृतीये तु कलहस्य भोक्तुः इति तुरीये तु सममुत्सवैर्ये इति च केचन पठन्ति। लिखिते न तथा दृश्यते । यथामातृकमेवास्माभिः स्वीकृतम् ।।

"इति श्री वासिष्ठस्य नरसिंहस्य सूनोः गणपतेः कृति "पाण्ड धार्तराष्ट्रसंभवो" नाम घण्टात्रयस्त्रिशद्बन्धः समाप्तः ।। वशिष्ठगोत्रोद्भवस्य नरसिंह शास्त्रिणः पुत्रः गणपति मुनुरिति विश्रुतः कविः तस्य कृतिः पाण्डव धार्तराष्ट्रसम्भवमित्यस्य नाम । घण्टात्रयस्त्रिशद्बन्धः = घण्टाकालेनिर्मितस्त्रयस्त्रिशच्छलोक परिमितः काव्यबन्धः रचना समाप्तः=सम्पूर्णा ।। यः महाकवेः काव्यकण्ठस्य समानोदरो शिवराम इति विश्रुतः तस्य पुत्रः "वरसिंह"शर्मा व्याख्यामरीरचत्।।



పుట	పంక్తి	తప్పు	ఒప్పు
2	18	श्रेण	श्रेणी
8	10	लोला	लीला
"	18 & 20	चक्षू:	चक्षुः
"	14	धारिणं	धारिणीं
7	4	मानं	मानां
"	14	चक्र	चक्रे
9	8	कुन्दलता	साधवो
"	12	रूपकां	रूपकं
10	11	पाण्डुं	पाण्डुः
"	19	अन्तं	अन्तः
12	2	सुताः	सुता
19	8	मादीनि	नादीनि
20	11	पट्टणे	पट्टने
"	15	साक	साकं

అనుబంధము.

1) జగద్గురూ నహం వందే బ్రహ్మవిష్ణు మహేశ్వరాన్
వాణీ లక్ష్మీ శివానాథాన్ నృష్టిస్థిత్యంత కారిణః

వాణీ లక్ష్మీ సనాథులును సృష్టిస్థిత్యంత కారులును జగద్గురులునగు బ్రహ్మ విష్ణు మహేశ్వరులను నమస్కరించుచున్నాను. తాము తమ పనులనుచేయుచు లోకమందలి వారు నట్లచేయవలెనని బోధించుచున్నారు. సృష్ట్యాది కారకులుగాన గురువులు, వారి జన్మకర్మలు దివ్యములు. సశక్తులు కాన వంద్యులు.

2) యశోభిర్దిగిభశ్రేణీ దంతకాంతిమలిమ్లుచైః
మండితః పాండురిత్యాసీద్భారతోభారతేనృపః

దిగ్గజముల దంతకాంతులను హరించు కీర్తులచే మండితుడైన పాండుడనురాజు భరతవంశజుడు భారతమువ కలడు. కీర్తిచే సితుడు సద్వంశజుడు ఖండాధిపతియు అనిభావము.

3) తస్య సర్వాగమజ్ఞస్య ప్రజ్ఞయైవ విలోచనీ
ధృతరాష్ట్ర ఇతిభ్రాతా జ్యేష్ఠః శ్రేష్ఠమతేరభూత్

సర్వశాస్త్రవిదుడైన యాతనికి ప్రజ్ఞానేత్రుడు (జాత్యంధుడు) నగు జ్యేష్ఠ సోదరుడు ధృతరాష్ట్రుడనువాడు కలడు. ప్రజ్ఞచే (లోకజ్ఞానముచే) సోదరుని బోధించి

రాష్ట్రమును తానే పాలించునట్లుండెను. పాలన్ప్రచతుడు కాడని భావము.

4) పూర్వజే నామువా పాండోః పరిణీతా
గుణోన్నతా
సుబలస్యసుతారాజ్ఞో గాంధారీనామ సుందరీ

సుబలుని కూతురుమ సుందరియు గుణవంతురాలైన గాంధారిని జ్యేష్ఠుడు వివాహమాడెను. వివాహము జ్యేష్ఠ క్రమమునైనది. రాజ్యాధికారము పాండునిది యని భావము. వర్జించే జ్యేష్ఠుడు రాజువలెనుండెను.

5) సా రామా యౌవనారంభే కించిత్పరిచితానవి
జనుషాన్ధం పతిం ప్రాప్య విసస్మారేవ విభ్రమాన్.

జనుషాంధుడైన పతిని వరించి గాంధారి యౌవనారంభ మున నవజములైన విభ్రమములను విస్మరించునది వలె నేత్రములను బంధించుకొనెను. అది ఆమె పాతివ్రత్యదీక్ష.

6) యాదవీ యామినీనాథ వదనా కాచిదంగనా
కాలే తస్మిన్పృథానామ పృథివీమండలేబభౌ.

ఆకాలమునందే భూగతయైన చంద్రవదనయు యదువంశ జురాలైన పృథాయను కన్యక కలదు.

7) న నఖ్యే కుంతిభోజాయ శూరశ్శూరవరఃపితా
పర్యదా దుహితృస్నేన ప్రీతిం మూర్తిమతీమివ.

శూరవరుడను నామెజనకుడు, కుంతిభోజునకు మూర్తి

ధరించిన ప్రీతివతె నామెను పుత్రికగ నిచ్చెను.

8) అముష్యైకిల సంతుష్టో దుర్వాసాః పరిచర్యయా
విద్యాముపదిదేశై కాం దేవానయనదూతికామ్.

ఆకన్యకకు పరిచర్యచే తుష్టుడై దుర్వాసుడు దేవానయన దూతికయైన విద్యనుపదేశించెను.

9) నసామిత్రం వశీచక్రే కేవలం విద్యయా తయా
కేతకీ కలికా కాంతైః కోమలై రంగకై రపి.

ఆమెయు నావిద్యచేత నేకాక కేతకీకలికాకాన్తములైన అంగకములచేతను కూడ మిత్రుని వశము చేసికొనెను.

10) సుతం సహజవర్మాణం లబ్ధ్వా రాజీవబంధుతః
కళంకశంకితా సద్యః సా ముమోచ సహాస్రుభిః

రాజీవ బంధుని వలన సహజకవచముకల పుత్రునిబొంది కళంక శంకితయై అస్రువులతోగూడ నాసుతుని విడిచెను.

11) కుంతీ వాసంతికాముక్తం రాధాధాత్రీభృతంతతః
సూర్యసూను ప్రసూనం తద్వీరశ్రీ శ్శిరసాదధౌ

కుంతీ వాసంతికాముక్తము రాధాధాత్రీ భృతమునైన నాసూర్యసూనుప్రసూనమును వీరశ్రీసిరసున ధరించెను.

12) కుంత్యాః కాన్త్యాజితరతేస్త్వపాం పత్యురను
గ్రహాత్
నై వాభ్రశ్యత కన్యాత్వం నచాక్షీయతయావనమ్

కాంతిచే రతిని మించిన కుంతికి సూర్యానుగ్రహముచే

కన్యాత్వము భ్రష్టముకాలేదు. యౌవనము సడలలేదు.

18) దత్తా సాకుంతిభోజేన పాండునా జగృహేకరే
దత్తఃకుసుమబాణేన తయా పాండుస్తుచేతసి.

కుంతి భోజుడామెను దానముచేయగా పాండుడామె కరగ్రహణముచేసెను. పంచబాణునిచే నీయబడి పాండురాజునామె చిత్తమున గ్రహించెను. మనసావరించెను.

14) అంతఃపరివిశ్యభూజానే ర్బాలసారంగలోచనాః
చరణాలక్తకేనేవ రక్తం చేతశ్చకారసా.

అంతఃపరివేశము జరిపి యాకురంగాక్షి చరణాలక్తకముచే వలె పాండునిమనస్సును రక్తమైనదిగా చేసెను.

15) కన్యాచాన్యా మహేశేవ మాద్రీ భద్రేభగామినీ
వరిణేతా పరిణత పాల్రేయకిరణాననా.

రాకానిశాకరాననయు భద్రేభగామినియునైన మాద్రిని కూడ ఆరాజు వరించెను.

16) కతిచిద్వత్సరాన్యాంతే తేద్వే విశ్వంభరామపి
దాక్షిణ్యేన సదీర్ఘాక్షో బుభుజే మనుజేశ్వరః

ఆ యిరువురిని దాక్షిణ్యముచే కొంతకాల మారాజు చూచుచు భూమిని పాలించెను.

17) జహారమృగయాదూరం మహీదారం తమేకదా
సకృన్ని షేవితమపి వ్యసనం హి పరాభవేత్.

ఒకనాడారాజు వేటకేగెను. వ్యసనమనునది సకృన్ని షేవితమయ్యి పరాభవించును.

18) క్రీడన్తం మృగసుందర్యా సమునింమృగభూమికమ్
పాండుర్జఘాన బాణేన సపాండుం ఘోరయాగిరా

మృగరూపుదాల్చి క్రీడించుచున్న ముని నాతడు బాణ
ము చేతొ ట్టెను. ముని శాపవాక్కుచే రాజును వేధించెను.

19) అనుభూయ భవానాన్కాంతామంతం దిష్టస్య
యాస్యతి

చంచరీక ఇవాఘ్రాయ చాంపేయ కలికామితి.

చంచరీకము చంపకమును సేవించి నశించుతీరున నీవును
కాంతను సేవించి నశింతువని

20) అథాసారంభవంబుద్ధ్వా బంధున్యస్త ధరాభరః
సతీభ్యాం సహపత్నీభ్యాం పాండుః ప్రవ్రజితో
వనమ్.

రాజా శాపముచే విరక్తుడై సంసారమసారమని ఎంచి
బంధులందు రాజ్యభార ముంచి భార్యలతో కూడ
నడవికేగెను.

21) శ్రుత్వాతతో మహర్షిభ్యో నాపుత్రోగతిమానితి
రాజాడేతజ్ఞ పంతత్వ్యకుంత్యాసాక
మమంతర్యత్.

అపుత్రస్య గతిర్నాస్తియని ఋషులవలన విని డేతజ్ఞ
పంతతికై కుంతితో నాలోచించెను.

22) అథాళి కుంతలా కుంతీ బహుపుత్రాభిలాషిణః
కామారోపార్థితాం విద్యాంశేడే పత్యుర్నిదేశతః

భర్తృ నిర్దేశమును తలచి కుంతియు కౌమారోపార్జిత మైన విద్యను సేవించెను.

28) తస్యాం యుధిష్ఠిరోనామ ధర్మాద్విద్యాబలాగతాత్
జేమాయ ఉితిలోకస్య పుణ్యశ్లోకః నుతోఒజనిః

ఉితిలోన జేమమునకై నావిద్యాబలముచే సమవర్తి యనుగ్రహమువలన యుధిష్ఠిరుడను పుత్రుని కుంతి పడసెను.

24) గజాయుతబలం పశ్చాదవాప గజగామినీ
పృథునేత్రం పృథాపుత్రం భీమంనామ సమీరణాత్

బహుపుత్రాభిలాషియైన భర్తృనిర్దేశమున గజాయుత బలుండును విశాలోరస్కుండును పృథునేత్రుడైన పుత్రుని పృథాదేవి మరుదనుగ్రహంబున బడసెను.

25) అర్జునం తనయంపాప్య వజ్రిపాణేరియం తతః
ప్రసాదం హరితాంపంక్తిః ప్రమోదం మరుతాంతతిః

వజ్రిపాణి యనుగ్రహంబున అర్జునుని గాంచెను. నాడు దిక్కులు నైర్మల్యంబును, దేవతలు పరిమోదంబును పొందిరి.

26) అపినర్వగుణోవేతై ర్నాతృప్యత్పితృభిరాత్మజైః
దిదృక్షుః పుత్రపూర్ణాంకాం మాద్రీమపి మహీపతిః

పుత్రపూర్ణాంకమైన మాద్రిని చూడదలచిన పాండుడీ పుత్రులచే తృప్తుడు కాకేదు.

27) మదేభ్యవంశనందిన్యై మేదినీ భర్తురాజ్ఞయా
వితతార పృథాదేవీ విద్యాందేవవశంకరీమ్
వతి యనుమతంబున నావిద్యను పృథాదేవి మాద్రికి నిచ్చెను.

28) దస్రాభ్యాం దయమానాభ్యాం ధరణీంద్రవధూరసౌ
నకులం సహదేవంచ సుతావాస సతీమణిః
అశ్వినుల యనుగ్రహంబున వామెయు నకుల సహదేవులను పుత్త్రులను పొందెను.

29) ధృతరాష్ట్రవధూర్గర్భం కుంత్యాపాగేవగర్భిణీ
చిరం సంతతి మపాప్య ఋషూనకిలముష్టినా
కుంతికి పూర్వమే గర్భవతియైన గాంధారి సంతానము పగిసనింపనందున పిడికిలిచే గర్భమును మోదెను.

30) ఫలితే శతథాగర్భే పతితే ధరణీతలే
ఆసన్వ్యాస పగిసాదేన శకలా శతమర్భకాః
పగిలిన (పగిసవోన్ముఖమైన) గర్భము నూరువగియలై నేలపడెను. వ్యాసపగిసాదమున నూర్గురు పుత్త్రులైరి

31) సర్వఋత్విజయేహేతుర్యేషాందుర్యోధనో ముఖమ్
దుశ్శాసనో వికర్ణశ్చ యేష్వన్యోమూర్ఖపండితా.
సర్వఋత్వియ వినాశహేతుభూతుడైన దుర్యోధనుడు జ్యేష్ఠుడును, మూర్ఖపండితులైన దుశ్శాసన వికర్ణులు ఇతరులలో ముఖ్యులునైరి.

82) సర్వఋతర్షయేహేతోఃధార్తరాష్ట్రస్యజన్మని
నవాత్యయా కేవలయా జగద్భీత్యాచ కంపితమ్.
రాజన్యవినాశకుడైన దుర్యోధనుని జననకాలమందు వాయువుచేతనేకాక భయముచేకూడ జగత్తు కంపించెను.

83) ఖండోఽపరశ్చందస్సి ఖండనిర్విశేషాశికస్థలీ
అభూత్కిలకులజ్యోత్స్నా దుస్సలానామ కన్యకా.
నూరుపగులులచే నూటయొక్కటి ముక్కలగును నూట యొకటవఖండముకూడ ఋషి ప్రసాదముచే కులజ్యోత్స్నయు చంద్రఖండ నిర్విశేషాలికస్థలియునైన దుస్సలాయనుకన్యక ఆయెను.

84) తేజాలకావవృధిరే నగరే వనేచ మూర్ధాభిషిక్త
మునిపుంగవ లాల్యమానా
కౌతూహలేనచమునే కలహప్రియస్య లోకస్య
లోచనవతస్సమముత్సవేన.

అడవియందు మునులచే లాలింపబడు పాండవులును నగరమందు రాజన్యులచే లాలితులగుచు కౌరవులును కలహప్రియుడైన నారదుని వేడుకతో కూడ వృద్ధినొందిరి. లోకజనుల నేత్రోత్సవము జరిగెను.

సకలతంత్ర స్వతంత్రుడు వేదాంతదేశికుడు పదవాక్య ప్రమాణ విదుడునైన నరసింహశర్మచే వ్యాఖ్యము ఆంధ్రీకృతపర్యంబును రచింపబడినవి.

ఇతిశం — ఓం తత్సత్.

30.1.74

For Copies :—

A. NARASIMHA SARMA,
LECTURER,
S. M. S. O. College,
PRODDATUR.
Cuddapah Dt. (A. P.)

SRI RANGARAMANUJA PRESS, TADPATRI.